खलाधारा, स्त्री, (खल आधारो यस्याः ।) तैलपायिका । इति जटाधरः ॥ आरसुला इति भाषा ॥

खलिः, पुं, (खल+इन् ।) तैलकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, भारतरत्नाकरे ।२।६८।
"स्थाल्यां वैदूर्य्यमय्यां पचति तिलखलिं चन्दनैरिन्धनौघैः ॥")

खलिनः, पुं क्ली, (खे अश्वमुखच्छिद्रे लीनः पृषोदरादित्वात् वा ह्रस्वः ।) खलीनः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, कादम्बर्य्याम्
"उभयतः खलिनकनककटकावलम्बाभ्यां पदे पदे कृताकुञ्चनप्रयत्नाभ्यां पुरुषाभ्यामवकृष्यमाणम् ।"
अश्वमित्यर्थः ॥)

खलिनी, स्त्री, (खलानां समूहः ।"इनि त्रकट्यचश्च ।" ४ । २ । ५१ । इति इनिः । ततो ङीष् ।) खलसमूहः । धानेर अनेक खामार इति भाषा ॥ तत्पर्य्यायः । खल्या २ । इत्यमरः । ३ । २ । ४२ ॥ तालमूली । इति रत्नमाला ॥

खलिशः, पुं, (खे जलादूर्द्ध्वाकाशे लिशति ईषदुद्गच्छतीति । यद्वा, खे जलाभ्यन्तरे छिद्रादौ लिशति स्वल्पीभावेन तिष्ठतीति । लिश्+कः ।) स्वनामख्यातमत्स्यः । खलिशामाछ् इति भाषा ॥ तत्पर्य्यायः । कङ्कत्रोटः २ खलेशयः ३ । इति शब्दरत्नावली ॥ अस्य गुणाः । ग्राहित्वम् । कषायत्वम् । वायुकोपनत्वम् । रूक्षत्वम् । लघुत्वम् । शूलहरत्वम् । किञ्चिदामविनाशित्वञ्च । इति राजवल्लभः ॥ खल्लिशोऽपि पाठः ॥

खलीकारः, पुं, (खल+कृ+घञ् । अभूततद्भावे च्विः ।) अपकारः । इति जटाधरः ॥ (निर्भर्त्सनम् । इति चिन्तामणिः ॥)

खलीनः, पुंक्ली, (खे अश्वमुखच्छिद्रे लीनः ।) कविका । इत्यमरः ।२।८।४६ ॥ कड़ियालि इति भाषा ॥ (यथा, महाभारते । १ । १६६ । १५ ।
"शतं रथानां वरहेममालिनां
चतुर्युजां हेमखलीनशालिनाम् ॥")

खलु, अ, (खल्+बाहुलकात् उन् ।) निषेधः । वाक्यालङ्कारः । (यथा, माघे । २ । ७० ।
"सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना ।
निर्द्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥"
"अत्राद्यखलुशब्दः प्रतिषेधार्थे द्वितीयः वाक्यालङ्कारे॥"इति तट्टीकायां मल्लिनाथः॥)जिज्ञासा । (यथा, गणरत्ने । "स खल्वधीते वेदम् ?") अनुनयः । इत्यमरः । ३ । ४।१८ ॥ (यथा, गणरत्ने ।
"न खलु न खलु मुग्धे ! साहसं कार्य्यमेतत्" ॥) निश्चितम् । (यथा, कुमारे । ४ । २८ ।
"दयितास्वनवस्थितं नृणां
न खलु प्रेम चलं सुहृज्जने ॥")
पदवाक्यादिपूरणम् । (यथा, रामायणे । ३ । ४१ । ६ ।
"दध्याः खलु न वध्यन्ते सचिवास्तव रावण ! ।
ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्व्वशः ॥")
वीप्सा । इति शब्दरत्नावली ॥ (यथा,— शाकुन्तले १ मे अङ्के ।
"न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ॥")

खलुक्, [ज्] पुं, (खं इन्द्रियं दर्शनेन्द्रियं लुञ्चयति हन्तीति । ख+लुञ्च+क्विप् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥

खलुरेषः, पुं, (खलुरिष्यते वध्यतेऽसौ । खलु+रिष्+कर्म्मणि घञ् ।) मृगभेदः । इति शब्दचन्द्रिका ॥

खलूरिका, स्त्री, (खलु+रिष्+निपातनात् साधुः ।) शस्त्राभ्यासभूमिः । इति हेमचन्द्रः ॥

खलेधानी, स्त्री, (खले धीयन्ते वृषभा अस्मिन् । धा+अधिकरणे ल्युट् ततो ङीप् ।) मेधिः । खलेपशुबन्धनदारु । इति जटाधरः ॥

खलेवाली, स्त्री, (खले वाल्यन्ते चाल्यन्तेऽत्र वृषभा इति । वल्+अधिकरणे घञ् गौरादित्वात् ङीष् ।) खले गोबन्धनदारु । इति हेमचन्द्रः ॥ मेइ काठ इति भाषा ॥ (यथा, कात्यायनश्रौतसूत्रे । २२ । ३ । ४८ ।
"खलेवालीयूपो लाङ्गलेषा॥")

खलेशः, पुं, (खे जलादूर्द्ध्वाकाशे गमनकाले लिशति संश्लिष्यतीति । लिश्+अच् ।) खलिशमत्स्यः । इति हारावली ॥

खलेशयः, पुं, (खलेशं जलादूर्द्ध्वस्याकाशसंसर्गं यातीति । या+कः ।) खलिशमत्स्यः । इति शब्दरत्नावली ॥

खल्या, स्त्री, (खलानां समूहः । यत् ।) खलिनी । इत्यमरः । ३ । ३ । ४२ ॥ धानमाड़ार अनेक खामार इति भाषा ॥

खल्लः, पुं, (खलतीति क्विप् खल् तं लातीति । ला आदाने+कः ।) वस्त्रप्रभेदः । गर्त्तः । चर्म्म । चातकपक्षी । इति मेदिनी ॥ दृतिः । इति हेमचन्द्रः ॥ मशक इति भाषा । औषधमर्द्दनपात्रम् । खल इति भाषा । इति वैद्यकम् ॥ ("अजाशकृत्तुषाग्निञ्च भूगर्भे हितयं क्षिपेत् ।
तस्योपरिस्थितं खल्लं तप्तखल्लमिति स्मृतम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

खल्लिका, स्त्री, (खल्ल+संज्ञायां कन् ततष्टाप् । कापि अत इत्वम् ।) ऋजीषम् । पिष्टकादिभर्ज्जनपात्रम् । इति शब्दचन्द्रिका ॥

खल्लिटः, त्रि, (खल्ल+इन् । खल्लि इव टलतीति । टल्+डः ।) खलतिः । इति शब्दरत्नावली ॥

खल्ली, स्त्री, (खल्ल+गौरादित्वात् ङीष् ।) हस्तपादावमर्द्दनाख्यरोगः । इति मेदिनी ॥ तस्य लक्षणं यथा, माधवकरः ।
"खल्ली तु पादजङ्घोरुकरमूलावमोटनी ॥"
तच्चिकित्सा यथा, भावप्रकाशे ।
"कुष्ठसैन्धवयोः कल्कश्चुक्रतैलसमन्वितः ।
सुखोष्णो मर्द्दने योज्यः खल्लीशूलनिवारणः ॥"
अपि च भैषज्यरत्नावल्याम् ।
"खल्ल्यां स्निग्धाम्ललवणैः स्वेदोष्णादीपनाहनम् ॥"

खल्लीटः, त्रि, (खल्लीव टलतीति । टल्+बाहुलकात् डः ।) खलतिः । इति त्रिकाण्डशेषः ॥ (तच्चिकित्सा यथा, गारुडे ।१८०।१ ।
"सप्तरात्रात्प्रजायन्ते खल्लीटस्य कचाः शुभाः ।
दग्धहस्तिदन्तलेपात् साजाक्षीररसाञ्जनात् ॥")

खव, ग भूतिपूत्योरुत्पत्तौ । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) भूतिः सम्पत्तिः पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भावः ॥

खवल्ली, स्त्री, (खे आकाशे स्थिता वल्ली ।) आकाशवल्ली । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्याया गुणाश्च । अथ आकाशवल्ली । अमरवेलि इति च भाषा ।
"आकाशवल्ली तु बुधैः कथितामरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पिच्छिला चामयापहा ।
तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खवारि, क्ली, (खे आकाशे स्थितं वारि उदकम् । खादागतं वारि वा ।) दिव्योदकम् । इति राजनिर्घण्टः ॥

खवाष्पः, पुं, (खे आकाशे शून्ये स्थितो वाष्पः ।) हिमम् । इति हारावली ॥

खशः, पुं, देशविशेषः । इति त्रिकाण्डशेषः ॥ (तद्देशवासिनि तद्देशनृपे च बहुषु अणो लुक् ।) तथा हि मनुः । १० । ४४ ।
"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः कीराता दरदाः खशाः॥")

खशा, स्त्री, मुरानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ (कखयोस्तुल्यार्थत्वात् खः प्रजापतिर्दक्षः आदौ तद्गर्भे कन्यात्मकबीजभावेन शेते इति । ख+शी+डः ततष्टाप् ।) दक्षकन्या । सा च कश्यपपत्नी । यथा,—
"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम् ।
अदितिर्दितिर्दनुः काला अनायुः सिंहिका मुनिः॥
कद्रुः प्राधा इरा क्रोधा विनता सुरभिः खशा ॥"
"इरा वृक्षलतावल्लीः तृणजातीश्च सर्व्वशः ।
खशा च यक्षरक्षांसि मुनिरप्सरसस्तथा ॥"
इति गारुड़े ६ अध्यायः ॥

खशेटः, पुं, (खं शेटति इति । शिट् अनादरे अण् । अस्य गमनसमये खस्यानादरत्वेन गतियोग्यत्वाभावेऽपि तद्वृत्तानादरेण गमनाकृष्टत्वम् ।) खलिशमत्स्यः । इति त्रिकाण्डशेषः ॥

खश्वासः, पुं, (खस्य आकाशस्य श्वास इव ।) वायुः । इति त्रिकाण्डशेषः ॥

खष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) खषति । इति दुर्गादासः ॥

खष्यं, क्ली, (खन्+"खष्यशिल्पशार्ष्येति ।" उणां ३ । २८ । इति यप्रत्ययात् निपातनात् सिद्धम् ।) क्रोधः । बलात्कारः । इत्युणादिकोषः ॥

खसः, पुं, (खं इन्द्रियं स्यति निष्फलीकरोतीति । सो+कः ।) पामा । खोस इति भाषा ॥ तत्पर्य्यायः । पाम २ कच्छूः ३ विचर्चिका ४ । इति हेमचन्द्रः ॥ (पामन्शब्देऽस्य विवरणं ज्ञातव्यम् ॥)